योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०११

एकादशः सर्गः ११

भुशुण्ड उवाच ।

शस्त्राणि दयिताङ्गानि लग्नान्यङ्गे निरम्बरे ।

यो बुद्ध्यमानः सुसमः स परस्मिन्पदे स्थितः ।। १

तावत्पुरुषयत्नेन धैर्येणाभ्यासमाहरेत् ।

यावत्सुषुप्ततोदेति पदार्थोदयनं प्रति ।। २

यथा भूतार्थतत्त्वज्ञमाधयोऽग्रगता अपि ।

न मनागपि लिम्पन्ति पयांसीव सरोरुहम् ।। ३

शस्त्राङ्गनानभांस्यङ्गलग्नान्यलमसंविदम् ।

अलग्नानीव शान्तात्मा यः पश्यति स पश्यति ।। ४

विषं यथा स्वान्तरेव दुर्घुणी भवति स्वयम् ।

न च दुर्घुणता नाम विषादन्यास्ति काचन ।। ५

स्वरूपमजहत्त्वेवं जीवतामधितिष्ठति ।

तथात्मा तत्परिज्ञानमात्रैकप्रविलापिनीम् ।। ६

जीवो भवति दुर्घूणोऽमृत्यात्मैव यथा तथा ।

अत्यजन्ती निज रूपं चिज्जडं रूपमृच्छति ।। ७

ब्रह्मण्यनन्योऽप्यन्याभो दुर्घुणः क्वचिदुत्थितः ।

तत्स्थः स एवास इवाप्यतत्स्थ इव सर्गकः ।। ८

विषं विषत्वमजहद्यथा स्वान्तः कृमिः क्रमात् ।

न जायते न म्रियते म्रियतेऽपि च जायते ।। ९

स्वेनैव संविदर्थेन पदार्थामग्नरूपिणा ।

तीर्यते गोष्पदमिव न तु दैवाद्भवार्णवः ।। 6.2.11.१०

सर्वभावान्तरावस्था सर्वभावातिशायिनी ।

अन्तःशीतलता यस्मिंस्तस्मिन्किमिव हेलनम् ।। ११

जगत्पदार्थसत्तान्तः सामान्येनाशु भाविते ।

मनोहंकारबुद्ध्यादि कः कलङ्कोऽमलात्मनि ।। १२

यथा घटपटाद्यर्थान्पश्यस्येवं शरीरकम् ।

तथाहन्त्वमनोबुद्धिवेदनाद्यपि पश्य हे ।। १३

जगत्पदार्थसार्थौघमनोबुद्ध्यादि संस्थितम् ।

ज्ञ एवासंविदंस्तिष्ठ परिनिष्ठितनिष्ठया ।। १४

न केनचित्कस्यचिदेव कश्चिद्दोषो न चैवेह गुणः कदाचित् ।

सुखेन दुःखेन भवाभवेन न चास्ति भोक्ता न च कर्तृता च ।। १५

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० निर्वाणप्रकरणे उत्तरार्धे विद्याधरो० यथाभूतार्थवेदनं नामैकादशः सर्गः ।। ११ ।।